# shrI vishvasArokta baTuka bhairava pa njara stotram

# શ્રી વિશ્વસારોક્ત બટુકભૈરવપઞ્જરસ્તોત્રમ્

## Document Information

Text title : baTukabhairavapanjara

File name : baTukabhairavapanjara.itx

Category : shiva, panjara

Location : doc_shiva

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Description/comments : Vishvasaratantra

Latest update : October 1, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# શ્રી વિશ્વસારોક્ત બટુકભૈરવપઞ્જરસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।
શ્રીગુરવૈ નમઃ ।
શ્રીભૈરવાય નમઃ ।
દેવ્યુવાચ ।
દેવદેવ મહાદેવ ભક્તાભીષ્ટપ્રદાયકઃ ।
પૂર્વં મે સૂચિતં નાથ બ્રૂહિત્વં કૃપયાધુનામ્ ॥ ૧॥

પઞ્જરં બટુકસ્યૈવ સર્વસિદ્ધિપ્રદાયકમ્ ।
સાધકાનાં હિતાર્થાય પ્રકાશં કુરુ ભૈરવ્ ॥ ૨॥

ભૈરવ ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ બટુકસ્ય ચ પઞ્જરમ્ ।
પઞ્જરસ્યાસ્ય દેવેશિ બૃહદારણ્યકો ઋષિઃ ।
છન્દોઽનુષ્ટુપ્ દેવેશિ બટુકો નામ દેવતા ॥ ૩॥

હ્રીં બીજં બટુકાયેતિ શક્તિસ્તુ પરિકીર્તિતા ।
પ્રણવં કીલકં પ્રોક્ત માગમજ્ઞૈર્વિનિશ્ચિતમ્ ।
સર્વાર્થસાધને દેવિ વિનિયોગઃ પરિકીર્તિતઃ ॥ ૪॥

અસ્ય શ્રીબટુકભૈરવપઞ્જરસ્ય બૃહદારણ્યક ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રી બટુક ભૈરવઃ દેવતા । હ્રીં બીજમ્ ।
બટુકાયેતિ શક્તિઃ । પ્રણવઃ કીલકમ્ ।
સર્વાર્થ સાધને (સર્વાભીષ્ટસિદ્ધ્યર્થે જપે/પાઠે) વિનિયોગઃ ॥

બટુકોવ્યાચ્છિરોદેશેલલાટેભૈરવેશ્વરઃ ।
કપોલૌક્ષેત્રપાલશ્ચભૂભાગેચાસિતાઙ્ગકઃ ॥ ૫॥

ખટ્વાઙ્ગધારીનાસાયાં નેત્રયોર્ભૂતનાયકઃ ।

ઉર્ધ્વોષ્ટે(ષ્ઠે)રુરુનાથશ્ચાધરોષ્ટે(ષ્ઠે)ધનેશ્વરઃ ॥ ૬॥

ચિબુકેકુલનાથોવ્યાન્મહેશોમુખમણ્ડલે ।
ક્ષેત્રેશોકણ્ઠદેશોવ્યાત્સ્કન્ધયોર્વાસિનીપતિઃ ॥ ૭॥

હૃદયેકામનાથોવ્યાત્કામ્યઘ્નોભુજમણ્ડલે ।
પાણૌરક્ષેન્મહાકાલોમાર્તણ્ડોચાઙ્ગુલીષુચ ॥ ૮॥

ઉદરેકાલકાલોવ્યાત્સર્વજ્ઞોનાભિમણ્ડલે ।
રક્તાક્ષોલિઙ્ગવ્યાતણ્ડકોષેસુરેશ્વરઃ ॥ ૯॥

કટ્યાંશૂલભૃત્પાતુવસ્તિદેશેઅઘાન્તકઃ ।
ઘોરાન્તકોપાતુચોર્ધોર્જઘનેશત્રુતાપનઃ ॥ ૧૦॥

પાદયોઃ પાતુકન્દર્પો કલ્પાન્તો ચાઙ્ગુલીષુ ચ ।
આકેશાત્પાદપર્યન્તં પાતુમાં ભૈરવેશ્વરઃ ॥ ૧૧॥

પ્રતીચ્યાં પાતુ ભૂતેશો યામ્યે બલિહરોઽવતુ ।
પ્રાચ્યાં કાલવિધિઃ પાતુ ઉદીચ્યાં પ્રથમેશ્વરઃ ॥ ૧૨॥

આગ્નેય્યાં ચ શિખી પાતુ નૈરૃત્યાં પ્રેતયોઽવતુ ।
વાયવ્યાં પ્રાણદઃ પાતુ ઐશાન્યામીશ્વરોઽવતુ ॥ ૧૩॥

ઇતીદં પઞ્જરં દેવિ સર્વમન્ત્રરહસ્યકમ્ ।
પઠનાત્પાઠનાદ્દેવિ સ્વયં સિદ્ધિશ્વરો ભવેત્ ॥ ૧૪॥

પ્રાતઃકાલે પઠેદ્યસ્તુ મુચ્યતે વ્યાધિબન્ધનાત્ ।
ભાનૌ મધ્યે ગતે યસ્તુ પઠનાદ્ધનવાન્ભવેત્ ॥ ૧૫॥

સાયઙ્કાલે પ્રપઠનાત્સર્વસિદ્ધિમવાપ્નુયાત્ ।
અર્ધરાત્રે પઠેદ્યસ્તુ શ્રુતિસ્તદ્ગત્માનસઃ ॥ ૧૬॥

સાક્ષાદ્ભૈરવરુપોઽસૌ જાયતે ભુવિ માનવઃ ।
પઞ્જરં ભૂર્જપત્રેષુ ચાષ્ટાઙ્ગન્ધેનલેખયેત્ ॥ ૧૭॥

ધારયેત્કરકણ્ઠેચબાહ્વોશિરસિ યં પુમાન્ ।
તસ્યસર્વાર્થસિદ્ધિઃ સ્યાન્નાત્રકાર્યાવિચારણાત્ ॥ ૧૮॥

શત્રુદસ્યુ ભયં નૈવ નૈવ ભૂતાદિજં ભયમ્ ।
અસ્યધારણ માત્રેણ સાધકો ભુવિ જાયતે ॥ ૧૯॥

અજ્ઞાત્વા પઞ્જરં દેવિ અજ્ઞાત્વા કૂટપઞ્જરમ્ ।
નાધિકારીભવેત્સોઽપિ અજપ્ત્વા નરકં વ્રજેત્ ।
તસ્માત્પઠેત્સદાભક્ત્યા પાતકાન્મુચ્યતે ધ્રુવમ્ ॥ ૨૦॥

॥ ઇતિ શ્રીવિશ્વસારોક્ત બટુકભૈરવપઞ્જરં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*shrI vishvasArokta baTuka bhairava pa njara stotram*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*